काव्यादर्शः

Kāvyādarśa
Chapters One and Two
(Incomplete)

दण्डिविरचितः

by
Daṇḍin[1]

April 28, 2002

[1]Based on the edition by S.K. Belvalkar, Poona 1924. Input by Reinhold Gruenendahl.

Contents

Chapter 1

प्रथमपरिच्छेदः

अथ काव्यादर्शः

चतुर्मुखमुखाम्भोज वनहंसवधूर्मम ।
मानसे रमतां दीर्घं सर्वशुक्ला सरस्वती॥ १॥
पूर्वशास्त्राणि संहृत्य प्रयोगानुपलक्ष्य च ।
यथासामर्थ्यमस्माभिः क्रियते काव्यलक्षणम्॥ २॥
इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा ।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥ ३॥
इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥ ४॥
आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम् ।
तेषामसंनिधाने ऽपि न स्वयं पश्य नश्यति॥ ५॥
गौर्गौः कामदुघा सम्यक्प्रयुक्ता स्मर्यते बुधैः ।
दुष्प्रयुक्ता पुनर्गोत्वं प्रयोक्तुः सैव शंसति॥ ६॥
तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथं चन ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्॥ ७॥
गुणदोषानशास्त्रज्ञः कथं विभजते नरः ।
किमन्धस्याधिकारो ऽस्ति रूपभेदोपलब्धिषु॥ ८॥
अतः प्रजानां व्युत्पत्तिमभिसंधाय सूरयः ।

वाचां विचित्रमार्गाणां निबबन्धुः क्रियाविधिम्॥ ९॥
तैः शरीरं च काव्यानामलंकाराश्च दर्शिताः ।
शरीरं तावदिष्टार्थ व्यवच्छिन्ना पदावली॥ १०॥
पद्यं गद्यं च मिश्रं च तत्त्रिधैव व्यवस्थितम् ।
पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा॥ ११॥
छन्दोविचित्यां सकलस्तत्प्रबन्धो निदर्शितः ।
सा विद्या नौस्विविक्षूणां गम्भीरं काव्यसागरम्॥ १२॥
मुक्तकं कुलकं कोशः संघात इति तादृशः ।
सर्गबन्धांशरूपत्वादनुक्तः पद्यविस्तरः॥ १३॥
सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तु निर्देशो वापि तन्मुखम्॥ १४॥
इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलायत्तं चतुरोदात्तनायकम्॥ १५॥
नगरार्णवशैलर्तु चन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडा मधुपानरतोत्सवैः॥ १६॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजि नायकाभ्युदयैरपि॥ १७॥
अलंकृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसंधिभिः॥ १८॥
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जनम् ।
काव्यं कल्पोत्तरस्थायि जायते सदलंकृति॥ १९॥
न्यूनमप्यत्र यैःकैश्चिदङ्गैः काव्यं न दुष्यति ।
यद्युपात्तेषु संपत्तिराराधयति तद्विदः॥ २०॥
गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम् ।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥ २१॥
वंशवीर्यश्रुतादीनि वर्णयित्वा रिपोरपि ।
तज्जयान्नायकोत्कर्ष वर्णनं च धिनोति नः॥ २२॥
अपादः पदसंतानो गद्यमाख्यायिका कथा ।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल॥ २३॥
नायकेनैव वाच्यान्या नायकेनेतरेण वा ।

स्वगुणाविष्क्रिया दोषो नात्र भूतार्थशंसिनः॥ २४॥
अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात् ।
अन्यो वक्ता स्वयं वेति कीदृग्वा भेदलक्षणम्॥ २५॥
वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम् ।
चिह्नमाख्यायिकायाश्चेत्प्रसङ्गेन कथास्वपि॥ २६॥
आर्यादिवत्प्रवेशः किं न वक्त्रापरवक्त्रयोः ।
भेदश्च दृष्टो लम्बादिरुच्छ्वासो वास्तु किं ततः॥ २७॥
तत्कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता ।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः॥ २८॥
कन्याहरणसंग्राम विप्रलम्भोदयादयः ।
सर्गबन्धसमा एव नैते वैशेषिका गुणाः॥ २९॥
कविभावकृतं चिह्नमन्यत्रापि न दुष्यति ।
मुखमिष्टार्थसंसिद्धौ किं हि न स्यात्कृतात्मनाम्॥ ३०॥
मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः ।
गद्यपद्यमयी काचित्चम्पूरित्यभिधीयते॥ ३१॥
तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा ।
अपभ्रंशश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम्॥ ३२॥
संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः ।
तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः॥ ३३॥
महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः ।
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम्॥ ३४॥
शौरसेनी च गौडी च लाटी चान्या च तादृशी ।
याति प्राकृतमित्येवं व्यवहारेषु संनिधिम्॥ ३५॥
आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः ।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम्॥ ३६॥
संस्कृतं सर्गबन्धादि प्राकृतं स्कन्धकादिकम् ।
ओसरादीन्यपभ्रंशो नाटकादि तु मिश्रकम्॥ ३७॥
कथापि सर्वभाषाभिः संस्कृतेन च बध्यते ।
भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम्॥ ३८॥
लास्यच्छलितशम्यादि प्रेक्षार्थमितरत्पुनः ।

श्रव्यमेवेति सैषापि द्वयी गतिरुदाहृता॥ ३९॥
अस्त्यनेको गिरां मार्गः सूक्ष्मभेदः परस्परम् ।
तत्र वैदर्भगौडीयौ वर्ण्येते प्रस्फुटान्तरौ॥ ४०॥
श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वं ओजःकान्तिसमाधयः॥ ४१॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।
एषां विपर्ययः प्रायो लक्ष्यते गौडवर्त्मनि॥ ४२॥

[श्लेष — शिथिल]
श्लिष्टमस्पृष्टशैथिल्यमल्पप्राणाक्षरोत्तरम् ।
शिथिलं मालतीमाला लोलालिकलिला यथा॥ ४३॥
अनुप्रासधिया गौडैस्तदिष्टं बन्धगौरवात् ।
वैदर्भैर्मालतीदाम लङ्घितं भ्रमरैरिति॥ ४४॥

[प्रसाद — व्युत्पन्न]
प्रसादवत्प्रसिद्धार्थमिन्दोरिन्दीवरद्युति ।
लक्ष्म लक्ष्मीं तनोतीति प्रतीतिसुभगं वचः॥ ४५॥
व्युत्पन्नमिति गौडीयैर्नातिरूढमपीष्यते ।
यथानत्यर्जुनाब्जन्म सदृक्षाङ्को बलक्षगुः॥ ४६॥

[समता — वैषम्य]
समं बन्धेष्वविषमं ते मृदुस्फुटमध्यमाः ।
बन्धा मृदुस्फुटोन्मिश्र वर्णविन्यासयोनयः॥ ४७॥
कोकिलालापवाचालो मामेति मलयानिलः ।
उच्छलच्छीकराच्छाच्छ निर्झराम्भःकणोक्षितः॥ ४८॥
चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः ।
स्पर्धते रुद्धमद्धैर्यो वररामामुखानिलैः॥ ४९॥
इत्यनालोच्य वैषम्यमर्थालंकारडम्बरौ ।
अपेक्षमाणा ववृधे पौरस्त्या काव्यपद्धतिः॥ ५०॥

[माधुर्य]
मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।

येन माध्यन्ति धीमन्तो मधुनेव मधुव्रताः॥ ५१॥

[अनुप्रास (शब्दालंकार) — वर्णावृत्ति]
यया कयाचिच्छ्रुत्या यत्समानमनुभूयते ।
तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा॥ ५२॥
एष राजा यदा लक्ष्मीं प्राप्तवान्ब्रह्मणप्रियः ।
ततः प्रभृति धर्मस्य लोके ऽस्मिन्नुत्सवो ऽभवत्॥ ५३॥
इतीदं नादृतं गौडैरनुप्रासस्तु तत्प्रियः ।
अनुप्रासादपि प्रायो वैदर्भैरिदमिष्यते॥ ५४॥
वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च ।
पूर्वानुभवसंस्कार बोधिनी यद्यदूरता॥ ५५॥
चन्द्रे शरन्निशोत्तंसे कुन्दस्तवकविभ्रमे ।
इन्द्रनीलनिभं लक्ष्म संदधात्यनिलः श्रियम्॥ ५६॥
चारु चन्द्रमसं भीरु बिम्बं पश्यैतदम्बरे ।
मन्मनो मन्मथाक्रान्तं निर्दयं हन्तुमुद्यतम्॥ ५७॥
इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम् ।
न तु रामामुखाम्भोज सदृशश्चन्द्रमा इति॥ ५८॥
स्मरः खरः खलः कान्तः कायः कोपश्च नः कृशः ।
च्युतो मानो ऽधिको रागो मोहो जातो ऽसवो गताः॥ ५९॥
इत्यादि बन्धपारुष्यं शैथिल्यं च निगच्छति ।
अतो नैवमनुप्रासं दाक्षिनात्याः प्रयुञ्जते॥ ६०॥

[यमक (शब्दालंकार)]
आवृत्तिं वर्णसंघात गोचरां यमकं विदुः ।
तत्तु नैकान्तमधुरमतः पश्चाद्विधास्यते॥ ६१॥

[अग्राम्यता (अर्थालंकार) — ग्राम्यता]
कामं सर्वो ऽप्यलंकारो रसमर्थे निषञ्चति ।
तथाप्यग्राम्यतैवैतं भारं वहति भूयसा॥ ६२॥
कन्ये कामयमानं मां न त्वं कामयसे कथम् ।
इति ग्राम्यो ऽयमर्थात्मा वैरस्याय प्रकल्पते॥ ६३॥

कामं कन्दर्पचाण्डालो मयि वामाक्षि निर्दयः ।
त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्यो ऽर्थो रसावहः॥ ६४॥
शब्दे ऽपि ग्राम्यतास्त्येव सा सभ्येतरकीर्तनात् ।
यथा यकारादिपदं रत्युत्सवनिरूपणे॥ ६५॥
पदसंधानवृत्त्या वा वाक्यार्थत्वेन वा पुनः ।
दुष्प्रतीतिकरं ग्राम्यं यथा या भवतः प्रिया॥ ६६॥
खरं प्रहृत्य विश्रान्तः पुरुषो वीर्यवानिति ।
एवमादि न शंसन्ति मार्गयोरुभयोरपि॥ ६७॥
भगिनीभगवत्यादि सर्वत्रैवानुमन्यते ।
विभक्तमिति माधुर्यमुच्यते सुकुमारता॥ ६८॥

[सुकुमारता — दीप्त]
अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते ।
बन्धशैथिल्यदोषस्तु दर्शितः सर्वकोमले॥ ६९॥
मण्डलीकृत्य बर्हाणि कण्ठैर्मधुरगीतिभिः ।
कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि॥ ७०॥
इत्यनूर्जित एवार्थो नालंकारो ऽपि तादृशः ।
सुकुमारतयैवैतदारोहति सतां मनः॥ ७१॥
दीप्तमित्यपरैर्भूम्ना कृच्छ्रोद्यमपि बध्यते ।
न्यक्षेण क्षयितः पक्षः क्षत्रियाणां क्षणादिति॥ ७२॥

[अर्थव्यक्ति — नेयत्व]
अर्थव्यक्तिरनेयत्वमर्थस्य हरिणोद्धृता ।
भूः खुरक्षुण्णनागासृग् लोहितादुदधेरिति॥ ७३॥
मही महावराहेण लोहितादुद्धृतोदधेः ।
इतीयत्येव निर्दिष्टे नेयत्वमुरगासृजः॥ ७४॥
नेदृशं बहु मन्यते मार्गयोरुभयोरपि ।
न हि प्रतीतिः सुभगा शब्दन्यायविलङ्घिनी॥ ७५॥

[उदारत्वम्]

उत्कर्षवान्गुणः कश्चिद्यस्मिन्नुक्ते प्रतीयते ।
तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः॥ ७६॥
अर्थिनां कृपणा दृष्टिस्त्वन्मुखे पतिता सकृत् ।
तदवस्था पुनर्देव नान्यस्य मुखमीक्षते॥ ७७॥
इति त्यागस्य वाक्ये ऽस्मिन्नुत्कर्षः साधु लक्ष्यते ।
अनेनैव पथान्यत्र समानन्यायमूह्यताम्॥ ७८॥
श्लाघ्यैर्विशेषणैर्युक्तमुदारं कैश्चिदिष्यते ।
यथा लीलाम्बुजक्रीडा सरोहेमाङ्गदादयः॥ ७९॥

[ओजस्]
ओजः समासभूयस्त्वमेतद्गद्यस्य जीवितम् ।
पद्ये ऽप्यदाक्षिणात्यानामिदमेकं परायणम्॥ ८०॥
तद्गुरूणां लघूनां च बाहुल्याल्पत्वमिश्रणैः ।
उच्चावचप्रकारं तद्दृश्यमाख्यायिकादिषु॥ ८१॥
अस्तमस्तकपर्यस्त समस्तार्कांशुसंस्तरा ।
पीनस्तनस्थिताताम्र कम्रवस्त्रेव वारुणी॥ ८२॥
इति पद्ये ऽपि पौरस्त्या बध्नन्त्योजस्विनीर्गिरः ।
अन्ये त्वनाकुलं हृद्यमिच्छन्त्योजो गिरां यथा॥ ८३॥
पयोधरतटोत्सङ्ग लग्नसंध्यातपांशुका ।
कस्य कामातुरं चेतो वारुणी न करिष्यति॥ ८४॥

[कान्ति — अत्युक्ति]
कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमात् ।
तच्च वार्त्ताभिधानेषु वर्णनास्वपि दृश्यते॥ ८५॥
गृहाणि नाम तान्येव तपोराशिर्भवादृशः ।
संभावयति यान्येव पावनैः पादपांसुभिः॥ ८६॥
अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः ।
अवकाशो न पर्याप्तस्तव बाहुलतान्तरे॥ ८७॥
इति संभाव्यमेवैतद्विशेषाख्यानसंस्कृतम् ।
कान्तं भवति सर्वस्य लोकयात्रानुवर्तिनः॥ ८८॥
लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः ।

यो ऽर्थस्तेनाति तुष्यन्ति विदग्धा नेतरे जनाः॥ ८९॥
देवधिष्ण्यमिवाराध्यमद्यप्रभृति नो गृहम् ।
युष्मत्पादरजःपात धौतनिःशेषकिल्बिषम्॥ ९०॥
अल्पं निर्मितमाकाशमनालोच्यैव वेधसा ।
इदमेवंविधं भावि भवत्याः स्तनजृम्भणम्॥ ९१॥
इदमत्युक्तिरित्युक्तमेतद्गौडोपलालितम् ।
प्रस्थानं प्राक्प्रणीतं तु सारमन्यस्य वर्त्मनः॥ ९२॥

[समाधि]
अन्यधर्मस्ततो ऽन्यत्र लोकसीमानुरोधिना ।
सम्यगाधीयते यत्र स समाधिः स्मृतो यथा॥ ९३॥
कुमुदानि निमीलानि कमलान्युन्मिषन्ति च ।
इति नेत्रक्रियाध्यासाल्लब्धा तद्वाचिनी श्रुतिः॥ ९४॥
निःष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते॥ ९५॥
पद्मान्यर्कांशुनिःष्ठ्यूताः पीत्वा पावकविप्रुषः ।
भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः॥ ९६॥
इति हृद्यमहृद्यं तु निःष्ठीवति वधूरिति ।
युगपन्नैकधर्माणामध्यासश्च स्मृतो यथा॥ ९७॥
गुरुगर्भभरक्लान्ताः स्तनन्त्यो मेघपङ्क्तयः ।
अचलाधित्यकोत्सङ्गमिमाः समधिशेरते॥ ९८॥
उत्सङ्गशयनं सख्याः स्तननं गौरवं क्लमः ।
इतीमे गर्भिणीधर्मा बहवो ऽप्यत्र दर्शिताः॥ ९९॥
तदेतत्काव्यसर्वस्वं समाधिर्नाम यो गुणः ।
कविसार्थः समग्रो ऽपि तमेकमनुगच्छति॥ १००॥

इति मार्गद्वयं भिन्नं तत्स्वरूपनिरूपणात् ।
तद्भेदास्तु न शक्यन्ते वक्तुं प्रतिकवि स्थिताः॥ १०१॥
इक्षुक्षीरगुडादीनां माधुर्यस्यान्तरं महत् ।
तथापि न तदाख्यातुं सरस्वत्यापि शक्यते॥ १०२॥
नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम् ।

अमन्दश्चाभियोगो ऽस्याः कारणं काव्यसंपदः॥ १०३॥
न विद्यते यद्यपि पूर्ववासना-
गुणानुबन्धि प्रतिभानमद्भुतम् ।
श्रुतेन यत्नेन च वागुपासिता
ध्रुवं करोत्येव कमप्यनुग्रहम्॥ १०४॥
तदस्ततन्द्रैरनिशं सरस्वती
श्रमादुपास्या खलु कीर्तिमीप्सुभिः ।
कृशे कवित्वे ऽपि जनाः कृतश्रमाः
विदग्धगोष्ठीषु विहर्तुमीशते॥ १०५॥

॥ इति काव्यादर्शे मार्गविभागो नाम प्रथमः परिच्छेदः॥

Chapter 2

द्वितीयपरिच्छेदः

काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते ।
ते चाद्यापि विकल्प्यन्ते कस्तान्कात्स्न्र्येन वक्ष्यति॥ १॥
किंतु बीजं विकल्पानां पूर्वाचार्यैः प्रदर्सितम् ।
तदेव प्रतिसंस्कर्तुमयमस्मत्परिश्रमः॥ २॥
काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः ।
साधारणमलंकार जातमन्यत्प्रदर्श्यते॥ ३॥

स्वभावाख्यानमुपमा रूपकं दीपकावृत्तिः ।
आक्षेपो ऽर्थान्तरन्यासो व्यतिरेको विभावना॥ ४॥
समासातिशयोत्प्रेक्षा हेतुः सूक्ष्मो लवः क्रमः ।
प्रेयो रसवदूर्जस्वि पर्यायोक्तं समाहितम्॥ ५॥
उदात्तापह्नुतिश्लेष विशेषास्तुल्ययोगिता ।
विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने॥ ६॥
सहोक्तिः परिवृत्त्याशिः संकीर्णमथ भाविकम् ।
इति वाचामलंकारा दर्शिताः पूर्वसूरिभिः॥ ७॥

[स्वभावोक्ति (= स्वभावाख्यान = जाति)]
नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती ।
स्वभावोक्तिश्च जातिश्चेत्याद्या सालंकृतिर्यथा॥ ८॥

[स्वभावोक्तिः जाति]
तुण्डैराताम्रकुटिलैः पक्षैर्हरितकोमलैः ।
त्रिवर्णराजिभिः कण्ठैरेते मञ्जुगिरः शुकाः॥ ९॥

[स्वभावोक्तिः क्रिया]
कलक्वणितगर्भेण कण्ठेनाघूर्णितेक्षणः ।
पारावतः परिभ्रम्य रिरंसुश्चुम्बति प्रियाम्॥ १०॥

[स्वभावोक्तिः गुण]
बध्नन्नङ्गेषु रोमाञ्चम्कुर्वन्मनसि निर्वृतिम् ।
नेत्रे चामीलयन्नेष प्रियास्पर्शः प्रवर्तते॥ ११॥

[स्वभावोक्तिः द्रव्य]
कण्ठेकालः करस्थेन कपालेनेन्दुशेखरः ।
जटाभिः स्निग्धताम्राभिराविरासीद्वृषध्वजः॥ १२॥

जातिक्रियागुणद्रव्य स्वभावाख्यानमीदृशम् ।
शास्त्रेष्वस्यैव साम्राज्यं काव्येष्वप्येतदीप्सितम्॥ १३॥

[उपमा]
यथा कथंचिद्सादृश्यं यत्रोद्भूतं प्रतीयते ।
उपमा नाम सा तस्याः प्रपञ्चो ऽयं निदर्श्यते॥ १४॥

[धर्मोपमा]
अम्भोरुहमिवाताम्रं मुग्धे करतलं तव ।
इति धर्मोपमा साक्षात्तुल्यधर्मप्रदर्शनात्॥ १५॥

[वस्तूपमा]
राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव ।
इयं प्रतीयमानैक धर्मा वस्तूपमैव सा॥ १६॥

[विपर्यासोपमा]
तवाननमिवोन्निद्रमरविन्दमभूदिति ।
सा प्रसिद्धिविपर्यासाद्विपर्यासोपमेष्यते॥ १७॥

[अन्योऽन्योपमा]
तवाननमिवाम्भोजमम्बोजमिव ते मुखम् ।
इत्यन्योऽन्योपमा सायमन्योऽन्योत्कर्षशंसिनी॥ १८॥

[नियमोपमा]
त्वन्मुखं कमलेनैव तुल्यं नान्येन केनचित् ।
इत्यन्यसाम्यव्यावृत्तेरियं सा नियमोपमा॥ १९॥

[अनियमोपमा]
पद्मं तावत्तवान्वेति मुखमन्यच्च तादृशम् ।
अस्ति चेदस्तु तत्कारीत्यसावनियमोपमा॥ २०॥

[समुच्चयोपमा]
समुच्चयोपमाप्यस्ति न कान्त्यैव मुखं तव ।
ह्लादनाख्येन चान्वेति कर्मणेन्दुमितीदृशी॥ २१॥

[अतिशयोपमा]
त्वय्येव त्वन्मुखं दृष्टं दृश्यते दिवि चन्द्रमाः ।
इयत्येव भिदा नान्येत्यसावतिशयोपमा॥ २२॥

[उत्प्रेक्षितोपमा]
मय्येवास्या मुखश्रीरित्यलमिन्दोर्विकत्थनैः ।
पद्मे ऽपि सा यदस्त्येवेत्यसावुत्प्रेक्षितोपमा॥ २३॥

[अद्भुतोपमा]
यदि किंचिद्भवेत्पद्मं सुभ्रु विभ्रान्तलोचनम् ।
तत्ते मुखश्रियं धत्तामित्यसावद्भुतोपमा॥ २४॥

[मोहोपमा]
शशीत्युत्प्रेक्ष्य तन्वङ्गि त्वन्मुखं त्वन्मुखाशया ।
इन्दुमप्यनुधावामीत्येषा मोहोपमा स्मृता॥ २५॥

[संशयोपमा]
किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम् ।

मम दोलायते चित्तमितीयं संशयोपमा॥ २६॥

[निर्णयोपमा]
न पद्मस्येन्दुनिग्राह्यस्य् एन्दुलज्जाकरी द्युतिः ।
अतस्त्वन्मुखमेवेदमित्यसौ निर्णयोपमा॥ २७॥

[श्लेषोपमा]
शिशिरांशुप्रतिस्पर्धि श्रीमत्सुरभिगन्धि च ।
अम्भोजमिव ते वक्त्रमिति श्लेषोपमा स्मृता॥ २८॥

[समानोपमा]
सरूपशब्दवाच्यत्वात्सा समानोपमा यथा ।
बालेवोद्यानमालेयं सालकाननशोभिनी॥ २९॥

[निन्दोपमा]
पद्मं बहुरजश्चन्द्रः क्षयी ताभ्यां तवाननम् ।
समानमपि सोत्सेकमिति निन्दोपमा स्मृता॥ ३०॥

[प्रशंसोपमा]
ब्रह्मणो ऽप्युद्भवः पद्मं चन्द्रः शंभुशिरोधृतः ।
तौ तुल्यौ त्वन्मुखेनेति सा प्रशंसोपमोच्यते॥ ३१॥

[आचिख्यासोपमा]
चन्द्रेण त्वन्मुखं तुल्यमित्याचिख्यासु मे मनः ।
स गुणो वास्तु दोषो वेत्याचिख्यासोपमां विदुः॥ ३२॥

[विरोधोपमा]
शतपत्त्रं शरच्चन्द्रस्त्वदाननमिति त्रयम् ।
परस्परविरोधीति सा विरोधोपमा मता॥ ३३॥

[प्रतिषेधोपमा]
न जातु शक्तिरिन्दोस्ते मुखेन प्रतिगर्जितुम् ।
कलङ्किनो जडस्येति प्रतिषेधोपमैव सा॥ ३४॥

[चटूपमा]
मृगेक्षणाङ्कं ते वक्त्रम्मृगेणैवाङ्कितः शशी ।
तथापि सम एवासौ नोत्कर्षीति चटूपमा॥ ३५॥

[तत्त्वाख्यानोपमा]
न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे ।
इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमैव सा॥ ३६॥

[असाधारणोपमा]
चन्द्रारविन्दयोः कान्तिमतिक्रम्य मुखं तव ।
आत्मनैवाभवत्तुल्यमित्यसाधारणोपमा॥ ३७॥

[अभूतोपमा]
सर्वपद्मप्रभासारः समाहृत इव क्वचित् ।
त्वदाननं विभातीति तामभूतोपमां विदुः॥ ३८॥

[असंभावितोपमा]
चन्द्रबिम्बादिव विषं चन्दनादिव पावकः ।
परुषा वागितो वक्त्रादित्यसंभावितोपमा॥ ३९॥

[बहूपमा]
चन्दनोदकचन्द्रांशु चन्द्रकान्तादिशीतलः ।
स्पर्शस्तवेत्यतिशयं बोधयन्ती बहूपमा॥ ४०॥

[विक्रियोपमा]
चन्द्रबिम्बादिवोत्कीर्णं पद्मगर्भादिवोद्धृतम् ।
तव तन्वङ्गि वदनमित्यसौ विक्रियोपमा॥ ४१॥

[मालोपमा]
पूष्ण्यातप इवाह्नीव पूषा व्योम्नीव वासरः ।
विक्रमस्त्वय्यधाल्लक्ष्मीमिति मालोपमा मता॥ ४२॥

[वाक्यार्थोपमा]
वाक्यार्थेनैव वाक्यार्थः को ऽपि यद्युपमीयते ।

एकानेकेवशब्दत्वात्सा वाक्यार्थोपमा द्विधा॥ ४३॥

[(१) वाक्यार्थोपमा मितेइनेमिव]
त्वदाननमधीराक्षमाविर्दशनदीधिति ।
भ्रमद्भृङ्गमिवालक्ष्य केसरं भाति पङ्कजम्॥ ४४॥

[(२) वाक्यार्थोपमा मित्मेह्रेरेनिव]
नलिन्या इव तन्वङ्ग्यास्तस्याः पद्ममिवाननम् ।
मया मधुव्रतेनेव पायं पायमरम्यत॥ ४५॥

[प्रतिवस्तूपमा]
वस्तु किंचिदुपन्यस्य न्यसनात्तत्सधर्मणः ।
साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा यथा॥ ४६॥
नैको ऽपि त्वादृशो ऽद्यापि जायमानेषु राजसु ।
ननु द्वितीयो नास्त्येव पारिजातस्य पादपः॥ ४७॥

[तुल्ययोगोपमा]
अधिकेन समीकृत्य हीनमेकक्रियाविधौ ।
यद्ब्रुवन्ति स्मृता सेयं तुल्ययोगोपमा यथा॥ ४८॥
दिवो जागर्ति रक्षायै पुलोमारिर्भुवो भवान् ।
असुरास्तेन हन्यन्ते सावलेपास्त्वया नृपाः॥ ४९॥

[हेतूपमा]
कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवम् ।
राजन्ननुकरोषीति सैषा हेतूपमा मता॥ ५०॥

न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ।
उपमादूषनायालं यत्रोद्वेगो न धीमताम्॥ ५१॥
स्त्रीव गच्छति षण्ढो ऽयं वक्त्येषा स्त्री पुमानिव ।
प्राणा इव प्रियो ऽयम्मे विद्या धनमिवार्जितम्॥ ५२॥
भवानिव महीपाल देवराजो विराजते ।
अलमंशुमतः कक्षामारोढुं तेजसा नृपः॥ ५३॥

इत्येवमादौ सौभाग्यं न जहात्येव जातुचित् ।
अस्त्येव क्वचिदुद्वेगः प्रयोगे वाग्विदां यथा॥ ५४॥
हंसीव धवलश्चन्द्रः सरांसीवामलं नभः ।
भर्तृभक्तो भटः श्वेव खद्योतो भाति भानुवत्॥ ५५॥
ईदृशं वर्ज्यते सद्भिः कारणं तत्र चिन्त्यताम् ।
गुणदोषविचाराय स्वयमेव मनीषिभिः॥ ५६॥

इववद्वायथाशब्दाः समाननिभसंनिभाः ।
तुल्यसंकाशनिकाश प्रकाशप्रतिरूपकाः॥ ५७॥
प्रतिपक्षप्रतिद्वंद्वि प्रत्यनीकविरोधिनः ।
सदृक्सदृशसंवादि सजातीयानुवादिनः॥ ५८॥
प्रतिबिम्बप्रतिच्छन्द सरूपसमसंमिताः ।
सलक्षणसदृक्षाभ सपक्षोपमितोपमाः॥ ५९॥
कल्पदेशीयदेश्यादिः प्रख्यप्रतिनिधी अपि ।
सवर्णतुलतौ शब्दौ ये चान्यूनार्थवादिनः॥ ६०॥
समासश्च बहुव्रीहिः शशाङ्कवदनादिषु ।
स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति॥ ६१॥
आक्रोशत्यवजानाति कदर्थयति निन्दति ।
विडम्बयति संधत्ते हसतीर्ष्यत्यसूयति॥ ६२॥
तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति ।
तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति॥ ६३॥
तत्पदव्याम्पदं धत्ते तस्य कक्षां विगाहते ।
तमन्वेत्यनुबध्नाति तच्छीलं तन्निषेधति॥ ६४॥
तस्य चानुकरोतीति शब्दाः सादृश्यमूचकाः ।
उपमायामिमे प्रोक्ताः कवीनां बुद्धिसौख्यदाः॥ ६५॥

[रूपक]

[समस्तरूपक]

उपमैव तिरोभूत भेदा रूपकमुच्यते ।
यथा बाहुलता पाणि पद्मं चरणपल्लवः॥ ६६॥

[असमस्तरूपक]
अङ्गुल्यः पल्लवान्यासन्कुसुमानि नखार्चिषः ।
बाहू लते वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी॥ ६७॥

[समस्तव्यस्तरूपक]
इत्येतदसमस्ताख्यं समस्तं पूर्वरूपकम् ।
स्मितं मुखेन्दोर्ज्योत्स्नेति समस्तव्यस्तरूपकम्॥ ६८॥

[सकलरूपक]
ताम्राङ्गुलिदलश्रेणि नखदीधितिकेसरम् ।
ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजम्॥ ६९॥
अङ्गुल्यादौ दलादित्वं पादे चारोप्य पद्मताम् ।
तद्योग्यस्थानविन्यासादेतत्सकलरूपकम्॥ ७०॥

[अवयवरूपक]
अकस्मादेव ते चण्डि स्फुरिताधरपल्लवम् ।
मुखं मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः॥ ७१॥
मञ्जरीकृत्य घर्माम्भः पल्लवीकृत्य चाधरम् ।
नान्यथा कृतमत्रास्यमतो ऽवयवरूपकम्॥ ७२॥

[अवयविरूपकम्]
वल्गितभ्रु गलद्धर्म जलमालोहितेक्षणम् ।
विवृणाति (!) मदावस्थामिदम्वदनपङ्कजम्॥ ७३॥
अविकृत्य मुखाङ्गानि मुखमेवारविन्दताम् ।
आसीद्गमितमत्रेदमतो ऽवयविरूपकम्॥ ७४॥

[एकाङ्गरूपक]
मदपाटलगण्डेन रक्तनेत्रोत्पलेन ते ।
मुखेन मुग्धः सो ऽप्येष जनो रागमयः कृतः॥ ७५॥
एकाङ्गरूपकं चैतदेवं द्विप्रभृतीन्यपि ।
अङ्गानि रूपयन्त्यत्र योगायोगौ भिदाकरौ॥ ७६॥

[युक्तरूपक]
स्मितपुष्पोज्ज्वलं लोल नेत्रभृङ्गमिदं मुखम् ।
इति पुष्पद्विरेफाणां संगत्या युक्तरूपकम्॥ ७७॥

[अयुक्तरूपक]
इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम् ।
इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम्॥ ७८॥

[विषमरूपक]
रूपणादङ्गिनो ऽङ्गानां रूपणारूपणाश्रयात् ।
रूपकं विषमं नाम ललितं जायते यथा॥ ७९॥
मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना ।
नर्तितभ्रूलतेनालं मर्दितुं भुवनत्रयम्॥ ८०॥

[सविशेषणरूपक]
हरिपादः शिरोलग्न जह्नुकन्याजलांशुकः ।
जयत्यसुरनिःशङ्क सुरानन्दोत्सवध्वजः॥ ८१॥
विशेषणसमग्रस्य रूपं केतोर्यदीदृशम् ।
पादे तदर्पणादेतत्सविशेषणरूपकम्॥ ८२॥

[विरुद्धरूपक]
न मीलयति पद्मानि न नभो ऽप्यवगाहते ।
त्वन्मुखेन्दुर्ममासूनां हरणायैव कल्पते॥ ८३॥
अक्रिया चन्द्रकार्याणामन्यकार्यस्य च क्रिया ।
अत्र संदर्श्यते यस्माद्विरुद्धं नाम रूपकम्॥ ८४॥

[हेतुरूपक]
गाम्भीर्येण समुद्रो ऽसि गौरवेणासि पर्वतः ।
कामदत्वाच्च लोकानामसि त्वं कल्पपादपः॥ ८५॥
गाम्भीर्यप्रमुखैरत्र हेतुभिः सागरो गिरिः ।
कल्पद्रुमश्च क्रियते तदिदं हेतुरूपकम्॥ ८६॥

[शिष्टरूपक]

राजहंसोपभोगार्थं भ्रमरप्रार्थ्यसौरभम् ।
सखि वक्त्राम्बुजमिदं तवेति श्लिष्टरूपकम्॥ ८७॥

इष्टं साधर्म्यवैधर्म्ये दर्शनाद्गौणमुख्ययोः ।
उपमाव्यतिरेकाख्यं रूपकद्वितयं यथा॥ ८८॥

[उपमारूपक]
अयमालोहितच्छायो मदने मुखचन्द्रमाः ।
संनद्धोदयरागस्य चन्द्रस्य प्रतिगर्जति॥ ८९॥

[व्यतिरेकरूपक]
चन्द्रमाः पीयते देवैर्मया त्वन्मुखचन्द्रमाः ।
असमग्रो ऽप्यसौ शश्वदयमापूर्णमण्डलः॥ ९०॥

[आक्षेपरूपक]
मुखचन्द्रस्य चन्द्रत्वमित्थमन्योपतापिनः ।
न ते सुन्दरि संवादीत्येतदाक्षेपरूपकम्॥ ९१॥

[समाधानरूपक]
मुखेन्दुरपि ते चण्डि मां निर्दहति निर्दयम् ।
भाग्यदोषान्ममैवेति तत्समाधानरूपकम्॥ ९२॥

[रूपकरूपक]
मुखपङ्कजरङ्गे ऽस्मिन्भ्रूलतानर्तकी तव ।
लीलानृत्यं करोतीति रम्यं रूपकरूपकम्॥ ९३॥

[आपह्नवरूपक]
नैतन्मुखमिदं पद्मं न नेत्रे भ्रमराविमौ ।
एतानि केसराण्येव नैता दन्तार्चिषस्तव॥ ९४॥
मुखादित्वं निवर्त्यैव पद्मादित्वेन रूपणात् ।
उद्भावितगुणोत्कर्षं तत्त्वापह्नवरूपकम्॥ ९५॥

न पर्यन्तो विकल्पानां रूपकोपमयोरतः ।
दिङ्मात्रं दर्शितं धीरैरनुक्तमनुमीयताम्॥ ९६॥

[दीपक]
जातिक्रियागुणद्रव्य वाचिनैकत्र वर्तिना ।
सर्ववाक्योपकारश्चेत्तदाहुर्दीपकं यथा॥ ९७॥

[आदिदीपक: जाति]
पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधां ।
स एवावनताङ्गीनां मानभङ्गाय कल्पते॥ ९८॥

[आदिदीपक: क्रिया]
चरन्ति चतुरम्भोधि वेलोद्यानेषु दन्तिनः ।
चक्रवालाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते॥ ९९॥

[आदिदीपक: गुण]
श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपङ्क्तिभिः ।
भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः॥ १००॥

[आदिदीपक: द्रव्य]
विष्णुना विक्रमस्थेन दानवानां विभूतयः ।
क्वापि नीताः कुतो ऽप्यासन्नानीता दैवतर्द्धयः॥ १०१॥

इत्यादिदीपकान्युक्तान्येवं मध्यान्तयोरपि ।
वाक्ययोर्दर्शयिष्यामः कानि चित्तानि तद्यथा॥ १०२॥

[मध्यदीपक: जाति]
नृत्यन्ति निचुलोत्सङ्गे गायन्ति च कलापिनः ।
बध्नन्ति च पयोदेषु दृशो हर्षाश्रुगर्भिणीः॥ १०३॥

[मध्यदीपक: क्रिया]
मन्दो गन्धवहः क्षारो वह्निरिन्दुश्च जायते ।
चर्चाचन्दनपातश्च शस्त्रपातः प्रवासिनाम्॥ १०४॥

[अन्तदीपक द्रव्य (व्याख्या — जाति)]
जलं जलधरोद्गीर्णं कुलं गृहशिखण्डिनाम् ।
चलं च तडितां दाम बलं कुसुमधन्वनः॥ १०५॥

[अन्तदीपकः क्रिया]
त्वया नीलोत्पलं कर्णे स्मरेणास्त्रं शरासने ।
मयापि मरणे चेतस्त्रयमेतत्समं कृतम्॥ १०६॥

[(आदिदीपक): मालादीपक]
शुक्लः श्वेतार्चिषो वृद्धौ पक्षः पञ्चशरस्य सः ।
स च रागस्य रागो ऽपि यूनां रत्युत्सवश्रियः॥ १०७॥
इत्यादिदीपकत्वे ऽपि पूर्वपूर्वव्यपेक्षिणी ।
वाक्यमाला प्रयुक्तेति तन्मालादीपकं मतम्॥ १०८॥

[विरुद्धार्थदीपक]
अवलेपमनङ्गस्य वर्धयन्ति बलाहकाः ।
कर्शयन्ति तु घर्मस्य मारुतोद्धूतशीकराः॥ १०९॥
अवलेपपदेनात्र बलाहकपदेन च ।
क्रिये विरुद्धे संयुक्ते तद्विरुद्धार्थं दीपकम्॥ ११०॥

[एकार्थदीपक]
हरत्याभोगमाशानां गृह्णाति ज्योतिषां गणम् ।
आदत्ते चाद्य मे प्राणानसौ जलधरावली॥ १११॥
अनेकशब्दोपादानात्क्रियैकैवात्र दीप्यते ।
यतो जलधरावल्या तस्मादेकार्थदीपकम्॥ ११२॥

[श्लिष्टार्थदीपक]
हृद्यगन्धवहास्तुङ्गास्तमालश्यामलत्विषः ।
दिवि भ्रमन्ति जीमूता भुवि चैते मतंगजाः॥ ११३॥
अत्र धर्मैरभिन्नानामभ्राणां दन्तिनां तथा ।
भ्रमणेनैव संबन्ध इति श्लिष्टार्थदीपकम्॥ ११४॥

अनेनैव प्रकारेण शेषाणामपि दीपके ।
विकल्पानामवगतिर्विधातव्या विचक्षणैः॥ ११५॥

[आवृत्ति]
अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरेव च ।

दीपकस्थान एवेष्टमलंकारत्रयं यथा॥ ११६॥

[अर्थावृत्ति]
विकसन्ति कदम्बानि स्फुटन्ति कुटजद्रुमाः ।
उन्मीलन्ति च कन्दल्यो दलन्ति ककुभानि च॥ ११७॥

[पदावृत्ति]
उत्कण्ठयति मेघानां माला वृन्दं कलापिनाम् ।
यूनां चोत्कण्ठयत्येव मानसं मकरध्वजः॥ ११८॥

[उभयावृत्ति (अर्थ पद)]
जित्वा विश्वं भवानत्र विहरत्यवरोधनैः ।
विहरत्यप्सरोभिस्ते रिपुवर्गो दिवं गतः॥ ११९॥

[आक्षेप]
प्रतिषेधोक्तिराक्षेपस्त्रैकाल्यापेक्षया त्रिधा ।
अथास्य पुनराक्षेप्य भेदानन्त्यादनन्तता॥ १२०॥

[वृत्ताक्षेप]
अनङ्गः पञ्चभिः पुष्पैर्विश्वं व्यजयतेषुभिः ।
इत्यसंभाव्यमथ वा विचित्रा वस्तुशक्तयः॥ १२१॥
इत्यनङ्गजयायोग बुद्धिर्हेतुबलादिह ।
प्रवृत्तैव यदाक्षिप्ता वृत्ताक्षेपः स ईदृशः॥ १२२॥

[वर्तमानाक्षेप]
कुतः कुवलयं कर्णे करोषि कलभाषिणि ।
किमपाङ्गमपर्याप्तमस्मिन्कर्मणि मन्यसे॥ १२३॥
स वर्तमानाक्षेपो ऽयं कुर्वत्येवासितोत्पल ।
कर्णे काचित्प्रियेणैवं चाटुकारेण रुध्यते॥ १२४॥

[भविष्यदाक्षेप]
सत्यं ब्रवीमि न त्वं मां द्रष्टुं वल्लभ लप्स्यसे ।
अन्यचुम्बनसंक्रान्त लाक्षारक्तेन चक्षुषा॥ १२५॥

सो ऽयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी ।
कदाचिदपराधो ऽस्य भावीत्येवमरुन्द्धयत्॥ १२६॥

[धर्माक्षेप]
तव तन्वङ्गि मिथ्यैव रूढमङ्गेषु मार्दवम् ।
यदि सत्यं मृदून्येव किमकाण्डे रुजन्ति माम्॥ १२७॥
धर्माक्षेपो ऽयमाक्षिप्तमङ्गनागात्रमार्दवम् ।
कामुकेन यदत्रैवं कर्मणा तद्विरोधिना॥ १२८॥

[धर्म्याक्षेप]
सुन्दरी सा भवत्येवं विवेकः केन जायते ।
प्रभामात्रं हि तरलं दृश्यते न तदाश्रयः॥ १२९॥
धर्म्याक्षेपो ऽयमाक्षिप्तो धर्मी धर्मं प्रभाह्वयम् ।
अनुज्ञायैव यद्रूपमत्याश्चर्यं विवक्षता॥ १३०॥

[कारणाक्षेप]
चक्षुषी तव रज्येते स्फुरत्यधरपल्लवः ।
भ्रुवौ च भुग्ने न तथाप्यदुष्टस्यास्ति मे भयम्॥ १३१॥
स एष कारणाक्षेपः प्रधानं कारणं भियः ।
स्वापराधो निषिद्धो ऽत्र यत्प्रियेण पटीयसा॥ १३२॥

[कार्याक्षेप]
दूरे प्रियतमः सो ऽयमागतो जलदागमः ।
दृष्टाश्च फुल्ला निचुला न मृता चास्मि किं न्विदम्॥ १३३॥
कार्याक्षेपः स कार्यस्य मरणस्य निवर्तनात् ।
तत्कारणमुपन्यस्य दारुणं जलदागमम्॥ १३४॥

[अनुज्ञाक्षेप]
न चिरं मम तापाय तव यात्रा भविष्यति ।
यदि यास्यसि यातव्यमलमाशङ्कयात्र ते॥ १३५॥
इत्यनुज्ञामुखेनैव कान्तस्याक्षिप्यते गतिः ।
मरणं सूचयन्त्यैव सो ऽनुज्ञाक्षेप उच्यते॥ १३६॥

[प्रभुत्वाक्षेप]
धनं च बहु लभ्यं ते सुखं क्षेमं च वर्त्मनि ।
न च मे प्राणसंदेहस्तथापि प्रिय मा स्म गाः॥ १३७॥
इत्याचक्षाणया हेतून्प्रिययात्रानुबन्धिनः ।
प्रभुत्वेनैव रुद्धस्तत्प्रभुत्वाक्षेप उच्यते॥ १३८॥

[अनादराक्षेप]
जीविताशा बलवती धनाशा दुर्बला मम ।
गच्छ वा तिष्ठ वा कान्त स्वश्वस्था तु निवेदिता॥ १३९॥
असावनादराक्षेपो यदनादरवद्वचः ।
प्रियप्रणायं रुन्धत्या प्रयुक्तमिह रक्तया॥ १४०॥

[आशीर्वचनाक्षेप]
गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान्॥ १४१॥
इत्याशीर्वचनाक्षेपो यदाशीर्वादवर्त्मना ।
स्वावस्थां सूचयन्त्यैव कान्तयात्रा निषिध्यते॥ १४२॥

[परुषाक्षेप]
यदि सत्यैव यात्रा ते काप्यन्या मृग्यतां त्वया ।
अहमद्यैव रुद्धास्मि रन्ध्रापेक्षेण मृत्युना॥ १४३॥
इत्येष परुषाक्षेपः परुषाक्षरपूर्वकम् ।
कान्तस्याक्षिप्यते यस्मात्प्रस्थानं प्रेमनिघ्नया॥ १४४॥

[साचिव्याक्षेप]

॥ १४५॥ ... ॥ ३०९॥

[श्लेष (श्लिष्ट)]
श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः ।
तदभिन्नपदं भिन्न पदप्रायमिति द्विधा॥ ३१०॥

[अभिन्नपदश्लेष]
असावुदयमारूढः कान्तिमान्रक्तमण्डलः ।
राजा हरति लोकस्य हृदयं मृदुभिः करैः॥ ३११॥

[भिन्नपदश्लेष]
दोषाकरेण संबध्नन्नक्षत्रपथवर्तिना ।
रज्ञा प्रदोषो मामित्थमप्रियं किं न बाधते॥ ३१२॥

उपमारूपकाक्षेप व्यतिरेकादिगोचराः ।
प्रागेव दर्शिताः श्लेषा दर्श्यन्ते केचनापरे॥ ३१३॥

अस्त्यभिन्नक्रियः कश्चिदविरुद्धक्रियो ऽपरः ।
विरुद्धकर्मा चास्त्यन्यः श्लेषो नियमवानपि॥ ३१४॥
नियमाक्षेपरूपोक्तिरविरोधी विरोध्यपि ।
तेषां निदर्शनेष्वेव रूपमाविर्भविष्यति॥ ३१५॥

[अभिन्नक्रियश्लेष]
वक्राः स्वभावमधुराः शंसन्त्यो रागमुल्बणम् ।
दृशो दूत्यश्च कर्षन्ति कान्ताभिः प्रेषिताः प्रियान्॥ ३१६॥

[अविरुद्धक्रियश्लेष]
मधुरा रागवर्धिन्यः कोमलाः कोकिलागिरः ।
आकर्ण्यन्ते मदकलाः श्लिष्यन्ते चासितेक्षणाः॥ ३१७॥

[विरुद्धकर्मश्लेष]
रागमादर्शयन्नेष वारुणीयोगवर्धितम् ।
तिरोभवति घर्मांशुरङ्गजस्तु विजृम्भते॥ ३१८॥

[नियमवच्छ्लेष]
निस्त्रिंशत्वमसावेव धनुष्येवास्य वक्रता ।
शरेष्वेव नरेन्द्रस्य मार्गणत्वं च वर्तते॥ ३१९॥

[नियमाक्षेपरूपोक्तिश्लेष]
पद्मानामेव दण्डेषु कण्टकस्त्वयि रक्षति ।

अथवा दृश्यते रागि मिथुनालिङ्गनेष्वपि॥ ३२०॥

[अविरोधिश्लेष]
महीभृद्भूरिकटकस्तेजस्वी नियतोदयः ।
दक्षः प्रजापतिश्चासीत्स्वामी शक्तिधरश्च सः॥ ३२१॥

[विरोधिश्लेष]
अच्युतो ऽप्यवृषच्छेदी राजाप्यविदितक्षयः ।
देवो ऽप्यविबुधो जज्ञे शंकरो ऽप्यभुजंगवान्॥ ३२२॥

[विशेषोक्ति]
गुणजातिक्रियादीनां यत्र वैकल्यदर्शनम् ।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते॥ ३२३॥

[विशेषोक्तिः गुण]
न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः ।
तथापि जितमेवासीदमुना भुवनत्रयम्॥ ३२४॥

[विशेषोक्तिः जाति]
न देवकन्यका नापि गन्धर्वकुलसंभवा ।
तथाप्येषा तपोभङ्गं विधातुं वेधसो ऽप्यलम्॥ ३२५॥

[विशेषोक्तिः क्रिया]
न बद्धा भ्रुकुटिर्नापि स्फुरितो दशनच्छदः ।
न च रक्ताभवद्दृष्टिर्जितं च द्विषतां बलम्॥ ३२६॥

[विशेषोक्तिः द्रव्य]
न रथा न च मातंगा न हया न च पत्तयः ।
स्त्रीणामपाङ्गदृष्ट्यैव जीयते जगतां त्रयम्॥ ३२७॥

[विशेषोक्तिः हेतु]
एकचक्रो रथो यन्ता विकलो विषमा हयाः ।
आक्रामत्येव तेजस्वी तथाप्यर्को नभस्तलम्॥ ३२८॥
सैषा हेतुविशेषोक्तिस्तेजस्वीति विशेषणात् ।

अयं एव क्रमो ऽन्येषां भेदानामपि कल्पते॥ ३२९॥

[तुल्ययोगिता]
विवक्षितगुणोत्कृष्टैर्यत्समीकृत्य कस्यचित् ।
कीर्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता॥ ३३०॥

यमः कुबेरो वरुणः सहस्राक्षो भवानपि ।
बिभृत्यनन्यविषयां लोकपाल इति श्रुतिम्॥ ३३१॥
संगतानि मृगाक्षीणां तडिद्विलसितानि च ।
क्षणद्वयं न तिष्ठन्ति घनारब्धान्यपि स्वयम्॥ ३३२॥

[विरोधचक्र]
विरुद्धानां पदार्थानां यत्र संसर्गदर्शनम् ।
विशेषदर्शनायैव स विरोधः स्मृतो यथा॥ ३३३॥
कूजितं राजहंसानां वर्धते मदमञ्जुलम् ।
क्षीयते च मयूराणां रुतमुत्क्रान्तसौष्ठवम्॥ ३३४॥
प्रावृषेण्यैर्जलधरैरम्बरं दुर्दिनायते ।
रागेण पुनराक्रान्तं जायते जगताम्मनः॥ ३३५॥
तनुमध्यं पृथुश्रोणि रक्तौष्ठमसितेक्षणम् ।
नतनाभि वपुः स्त्रीणां कं न हन्त्युन्नतस्तनम्॥ ३३६॥
मृणालबाहु रम्भोरु पद्मोत्पलमुखेक्षणम् ।
अपि ते रूपमस्माकम्तन्वि तापाय कल्पते॥ ३३७॥
उद्यानमारुतोद्धूताश्चूतचम्पकरेणवः ।
उदश्रयन्ति पान्थानामस्पृशन्तो ऽपि लोचने॥ ३३८॥
कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।
याति विश्वसनीयत्वं कस्य ते कलभाषिणी॥ ३३९॥

इत्यनेकप्रकारो ऽयमलंकारः प्रतीयते ।

[अप्रस्तुतप्रशंसा]
अप्रस्तुतप्रशंसा स्यादप्रकान्तेषु या स्तुतिः॥ ३४०॥
सुखं जीवन्ति हरिणा वनेष्वपरसेविनः ।

अर्थैरयत्नसुलभैर्जलदर्भाङ्कुरादिभिः॥ ३४१॥
सेयमप्रस्तुतैवात्र मृगवृत्तिः प्रशस्यते ।
राजानुवर्तनक्लेश निर्विण्णेन मनस्विना॥ ३४२॥

[व्याजस्तुति]
यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ स्तुता ।
दोषाभासा गुणा एव लभन्ते यत्र संनिधिम्॥ ३४३॥
तापसेनापि रामेण जितेयं भूतधारिणी ।
त्वया राज्ञापि सेवेयं जिता मा भून्मदस्तव॥ ३४४॥
पुंसः पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते ।
राजन्निक्ष्वाकुवंशस्य किमिदं तव युज्यते॥ ३४५॥
भुजङ्गभोगसंसक्ता कलत्रं तव मेदिनी ।
अहंकारः परां कोटिमारोहति कुतस्तव॥ ३४६॥
इति श्लेषानुविद्धानामन्येषां चोपलक्ष्यतां ।
व्याजस्तुतिप्रकाराणामपर्यन्तः प्रविस्तरः॥ ३४७॥

[निदर्शन]
अर्थान्तरप्रवृत्तेन किंचित्तत्सदृशं फलम् ।
सदसद्वा निदर्श्येत यदि तत्स्यान्निदर्शनम्॥ ३४८॥
उदयन्नेव सविता पद्मेष्वर्पयति श्रियम् ।
विभावयितुमृद्धीनां फलं सुहृदनुग्रहम्॥ ३४९॥
याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवम् ।
सद्यो राजविरुद्धानां सूचयन्ति दुरन्तताम्॥ ३५०॥

[सहोक्ति]
सहोक्तिः सहभावस्य कथनं गुणकर्मणाम् ।
अर्थानां यो विनिमयः परिवृत्तिस्तु सा यथा॥ ३५१॥
सह दीर्घा मम श्वासैरिमाः संप्रति रात्रयः ।
पाण्डुराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः॥ ३५२॥
वर्धते सग पान्थानां मूर्छया चूतमञ्जरी ।
पतन्ति च समं तेषामसुभिर्मलयानिलाः॥ ३५३॥

कोकिलालापसुभगाः सुगन्धिवनवायवः ।
यान्ति सार्धं जनानन्दैर्वृद्धिं सुरभिवासराः॥ ३५४॥
इत्युदाहृतयो दत्ताः सहोक्तेरत्र काश्चन ।

[परिवृत्ति]
क्रियते परिवृत्तेश्च किंचिद्रूपनिरूपणम्॥ ३५५॥
शस्त्रप्रहारं ददता भुजेन तव भूभुजाम् ।
चिरार्जितं हृतं तेषां यशः कुमुदपाण्डुरम्॥ ३५६॥

[आशीस्]
आशीर्नामाभिलषिते वस्तुन्याशंसनं यथा ।
पातु वः परमं ज्योतिरवाङ्मनसगोचरम्॥ ३५७॥

[संसृष्टि]
अनन्वयससंदेहावुपमास्वेव दर्शितौ ।
उपमारूपकं चापि रूपकेष्वेव दर्शितम्॥ ३५८॥
उत्प्रेक्षाभेद एवासावुत्प्रेक्षावयवो ऽपि च ।
नानालंकारसंसृष्टिः संसृष्टिस्तु निगद्यते॥ ३५९॥
अङ्गाङ्गिभावावस्थानं सर्वेषां समकक्षता ।
इत्यलंकारसंसृष्टेर्लक्षणीया द्वयी गतिः॥ ३६०॥
आक्षिपन्त्यरविन्दानि तव मुग्धे मुखश्रियम् ।
कोशदण्डसमग्राणां किमेषामस्ति दुष्करम्॥ ३६१॥
(लिम्पतीव तमो ऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्निष्फलतां गता॥ ३६२॥)
श्लेषः सर्वासु पुष्णाति प्रियो वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्॥ ३६३॥

[भाविक]
भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम् ।
भावः कवेरभिप्रायः काव्येष्वासिद्धि यः स्थितः॥ ३६४॥
परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम् ।
विशेषणानां व्यर्थानामक्रिया स्थानवर्णना॥ ३६५॥

व्यक्तिरुक्तिक्रमबलाद्गम्भीरस्यापि वस्तुनः ।
भावायत्तमिदं सर्वमिति तद्भाविकं विदुः॥ ३६६॥

यच्च संध्यङ्गवृत्त्यङ्ग लक्षणाद्यागमान्तरे ।
व्यावर्णितमिदं चेष्टमलंकारतयैव नः॥ ३६७॥
पन्था स एष विवृतः परिमाणवृत्त्या
संक्षिप्य विस्तरमनन्तमलंक्रियाणां ।
वाचामतीत्य विषयं परिवर्तमाना-
नभ्यास एव विवरीतुमलं विशेषान्॥ ३६८॥

इत्याचार्यदण्डिनः कृतौ काव्यादर्शेऽर्थालंकारविभागो नाम द्वितीयः परिच्छेदः॥